## श्री धर्मसूरीश्वर–गुरुस्तुतयः

भक्तौस्तीर्थसमा जिनेन्द्रनिलया यस्योपदेशात् कृताः,
ग्रन्थैस्तात्त्वभरैस्तथा प्रवचनैर्नैके जना निर्वृताः ।
येनाऽहं सततोपकारनिवहैः सिक्तः सदा भास्वरं,
वन्दे तं गुणसागरं गुरुवरं श्री धर्मसूरीश्वरम् ।।

- पूज्याचार्यवर्यश्रीसूर्योदयसूरीश्वराः
(सुमङ्गलाटीकाभावानुवादादुद्धृता)

दधामि चित्ते गुरुधर्मभक्तिं,
स्मरामि चित्ते गुरुधर्मशक्तिम् ।
सृजामि धर्मस्तवनां च भूरिं,
नमामि नित्यं गुरुधर्मसूरिम् ।।

- पूज्याचार्यवर्यश्रीराजरत्नसूरीश्वराः

येषां स्वान्तं विमलजलवन्निर्मलं हन्ति तापम्,
येषां शुभ्रो गुणगणनिधिर्हन्ति दोषोपतापम् ।
येषां ज्ञानं वितरति मुदं पण्डितानां नराणाम्,
तेषां वन्दे चरणयुगलं धर्मसूरीश्वराणाम् ।।

- पूज्याचार्यवर्यश्रीराजरत्नसूरीश्वराः

Designed & Printed by : JAYANT PRINTERY LLP Mumbai-2. Tel.: 4366 7171

नमामि नित्यं गुरुधर्मसूरिम् - मुनिः अक्षयरत्नविजयः



# नमामि नित्यं गुरुधर्मसूरिम्

मुनिः अक्षयरत्नविजयः